# पादवार्षिकमूल्यनिर्णयः - संस्कृतम्

## कक्ष्या - X

प्रश्नसञ्चयः                अक्कादमिक - संस्कृतविद्यालयानां कृते (Part I)

## एककम् - १

**पाठ्यचर्योद्देश्यम् -** द्विकर्मकधातूनां प्रयोगः।

प्रश्नः 1 सेनापतिः सेनां समराङ्कणं नयति।

याचकाः धनिकं धनं याचन्ते। एतेषु वाक्येषु दृश्यमाना विशेषता का इति लिखत।

प्रश्नः 2 पाचकः गोधूमान् पायसं पचति इति वाक्ये पायसं प्रधानकर्म भवति। तर्हि यजमानः पीठं ग्रामं वहति इति वाक्यात् प्रधानकर्म निर्धार्य लिखत।

समयः - 4 निमेषाः

अङ्काः - 2

**पाठ्यचर्योद्देश्यम् -** परस्मैपदात्मनेपदक्रियापदानां प्रयोगः।

प्रश्नः 3 प्रदत्तेभ्यः पदेभ्यः परस्मैपदरूपाणि विविच्य लिखत।

असूत, आसीत्, अकुरुत, प्रायच्छत्, अकरोत्।

प्रातिष्ठत, अलभत, अयाचत, अतिष्ठत्।

समयः - 8 निमेषाः

अङ्काः - 4

**पाठ्यचर्योद्देश्यम् -** परस्मैपदात्मनेपदक्रियापदानां प्रयोगः।

प्रश्नः 4 पुरा लोकानां सम्भवात् प्राक् सर्वत्र जलमेव <u>आसीत्</u>। ततः जलस्य मध्ये विशालमेकं पद्मम् आविर्भवत्। तत्र पितामहः <u>अजायत</u>। अत्र रेखाङ्कितानि पदानि परस्मैपदे वा आत्मनेपदे वा अन्तर्भवति इति लिखत।

समयः - 4 निमेषाः

अङ्काः - 2

**पाठ्यचर्योद्देश्यम्** - गद्यांशं पठित्वा आशयं स्वांशीकृत्य सम्भाषणरचना।

प्रश्नः 5 सम्भाषणांशान् पूरयत।

वणिक् - नमो भवते।

वित्तकोशाधिकारी - नमस्ते। ......................

प्रथमः - अहम् एकः संस्कृतपुस्तकविक्रेता अस्मि। मम व्यापारस्य विकासाय धनसहायं लभ्यते वा इति ज्ञातुम् इच्छामि।

द्वितीयः - ......................

प्रथमः - लक्षद्वयरूप्यकाण्यावश्यकानि।

द्वितीयः - तदर्थं भवता अपेक्षा दातव्या।

प्रथमः - ......................

द्वितीयः - अपेक्षापत्रम् ऋणदानविभागात् लभ्यते।

प्रथमः - ......................

समयः - 8 निमेषाः

अङ्काः - 4

# एककम् - २

**पाठ्यचर्योद्देश्यम्** - सूचनानुसारं खण्डिकालेखनम्।

प्रश्नः 6 सूचनाः विपुलीकृत्य सस्यक्षेत्रं कथं सज्जीकरणीयम् इति विषयमधिकृत्य खण्डिकां लिखत।

(सस्यक्षेत्रं - मृदुमृत्तिकायुक्तं - तिलवपनं - मृत्तिकया सह योजनं - बालवृक्षरोपणम्)

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम्** - सूचनानुसारं टिप्पणीलेखनम्।

प्रश्नः 7 सूचनाः पठित्वा वृक्षपालनविषये टिप्पणीं लिखत।

(सेकविधिः - देशान्तरनयनं - कालनियमः - वृक्षयोरन्तरम्)

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम्** - सूचनानुसारं खण्डिकालेखनम्।

प्रश्नः 8 सूचनाः सम्यक् पठित्वा वृक्षचिकित्सामधिकृत्य खण्डिकां लिखत।

(रोगाः, रोगकारणानि, व्रणविशोधनं - मिश्रितलेपनं - क्षीरजलसेचनम्)

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम्** - निर्दिष्टविषयमधिकृत्य टिप्पणीलेखनम्।

प्रश्नः 9 सूचनानुसारं बृहत्संहितायां प्रतिपादितां सङ्करवृक्षविधिं स्ववाक्यैः विशदयत। (काण्डरोप्याः - गोमयेन प्रलेपनं - छिन्नमूलः - स्कन्धः - संश्लेषितः)

प्रश्नः 10 वृक्षयोर्मध्ये अन्तरमावश्यकम् इति वृक्षायुर्वेदे प्रतिपादितः। नो चेत् कः दोषः? वृक्षरोपणविधयः इति पाठस्याधारेण विशदयत।

समयः - 6 निमेषाः

अङ्काः - 3

## एककम् - ३

**पाठ्यचर्योद्देश्यम्** - गुणत्रयं मानवजीवनं कथं स्वाधीनीकरोति इति परिज्ञानम्।

प्रश्नः 11 सूचनानुसारं श्रद्धात्रयमधिकृत्य सूचनाः अवलम्ब्य लघुटिप्पणीं रचयतु।

(त्रिविधा श्रद्धा - सत्वानुरूपता - देवादीनां पूजनम्)

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम्** - गुणत्रयं मानवजीवनं कथं स्वाधीनीकरोति इति परिज्ञानम्।

प्रश्नः 12 सूचनानुसारं तपसः त्रैविध्यं गीतामृतस्याधारेण विशदयत।

(शारीरिकं तपः - वाचिकं तपः - मानसिकं तपः)

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम् -** गुणत्रयं मानवजीवनं कथं स्वाधीनीकरोति इति परिज्ञानम्।

प्रश्नः 13 "आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः।" एतदाधारीकृत्य आहारत्रैविध्यं विशदयत।

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम् -** गद्यांशं / पद्यांशं पठित्वा आशयावगमः। सन्धिप्रयोगपरिचयः।

प्रश्नः 14 श्लोकं पठित्वा अधो लिखितानां प्रश्नानाम् उत्तराणि लिखत।

यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः।।

- सात्विकाः किं कुर्वन्ति?
- यक्षरक्षांसि के यजन्ते?
- तामसा जनाः किं कुर्वन्ति?
- उदाहरणानुसारं सन्धिच्छेदं लिखत -

  कोपितांश्च - कोपितान् + च।

  भूतगणांश्च - ..........................।
- उदाहरणानुसारं विग्रहं लिखत -

  सत्वगुणयुक्ताः - सात्विकाः।

  .................. - राजसाः।

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम् -** भाषान्तरीकरणसामर्थ्यसम्पादनम्।

प्रश्नः 15 प्रादेशिकभाषायाम् आशयं लिखत।

अन्नदानं महादानं विद्यादानं महत्तरम्।

अन्नेन क्षणिका तृप्तिः यावज्जीवं तु विद्यया।।

समयः - 4 निमेषाः

अङ्काः - 2

**पाठ्यचर्योद्देश्यम् -** पद्यांशं पठित्वा आशयावगमः।

प्रश्नः 16 कटु - अम्ल - कषाय रसयुक्तानां भोज्यवस्तूनाम् एकैकं नाम लिखत।

समयः - 6 निमेषाः

अङ्काः - 3

**पाठ्यचर्योद्देश्यम् -** गद्यांशं पठित्वा आशयामवगमः।

प्रश्नः 17 खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

त्रयः होराः एकः यामः भवति। एकस्मिन्नहोरात्रे दिवा चत्वारः रात्रौ चत्वारः इत्यष्टौ यामाः विद्यन्ते। पञ्चदशभिः अहोरात्रैः एकः पक्षः सञ्जायते। शुक्लपक्षः कृष्णपक्षश्चेति द्वौ पक्षौ भवतः। अमावास्याया अनन्तरदिनादारभ्य पौर्णमासी तावत् शुक्लपक्षः। पूर्णिमाया अनन्तरदिनादारभ्य अमावासी तावत् कृष्णपक्षः।

- एकस्मिन् यामे कति होराः सन्ति?
- पक्षः इत्यनेन विवक्षितः अर्थः कः?
- कति यामाः विद्यन्ते?
- पक्षद्वयेष्वन्यतमः?
- कृष्णपक्षः कदा आरभ्यते?

समयः - 10 निमेषाः

अङ्काः - 5

# एककम् - ४

**पाठ्यचर्योद्देश्यम् -** आयुर्वेदाचार्यैः सह अष्टाङ्गान्यधिकृत्य अभिमुखभाषणं कृत्वा टिप्पणीलेखनम्।

प्रश्नः 18 सम्भाषणांशान् पूरयत।

बालकाः - आचार्य! नमो भवते।

आचार्यः - नमोवाकम्। .........................।

बालकाः - वयं समीपस्थात् मातृकाविद्यालयात् आगच्छामः।

आचार्यः - .........................।

बालकाः - अष्टाङ्गान्यधिकृत्य ज्ञातुम् इच्छामः।

आचार्यः - योगशास्त्रप्रतिपादितम् अष्टाङ्गं वा .........................।

बालकाः - आयुर्वेदशास्त्रप्रतिपादितम् अष्टाङ्गम्।

समयः - 6 निमेषाः

अङ्काः - 3

**पाठ्यचर्योद्देश्यम् -** गद्यांशं पठित्वा आशयावगमः।

प्रश्नः 19 खण्डिकां पठित्वा उत्तराणि लिखत।

आयुषः वेदः आयुर्वेदः। आयुर्वेदे आयुषः पालनाय संवर्धनाय च उपायाः उक्ताः। अस्मिन् शास्त्रे चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयञ्चेति प्रसिद्धाः ग्रन्थाः उपलभ्यन्ते। केरलीयेन वाग्भटेन विरचितो भवति अष्टाङ्गहृदयः। कायचिकित्साविभागस्य प्रामाणिकः ग्रन्थः भवति चरकसंहिता।

- आयुषः संवर्धनाय पालनाय च उपायाः कुत्र उक्ताः?
- अष्टाङ्गहृदयस्य विशेषता का?
- चरकसंहिता कस्य चिकित्साविभागस्य प्रामाणिकः ग्रन्थः भवति?
- आयुर्वेदस्य विग्रहरूपम् आयुषः वेद इति। एवं धनुर्वेदस्य विग्रहरूपं लिखत।
- आयुर्वेदशास्त्रग्रन्थाः के?

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम् -** निर्दिष्टविषयमधिकृत्य टिप्पणीलेखनम्।

प्रश्नः 20 आयुर्वेदस्य अष्टाङ्गचिकित्सापद्धतीषु यथेष्टं तिस्रः पद्धतीः विशदयत।

समयः - 12 निमेषाः

अङ्काः - 6

**पाठ्यचर्योद्देश्यम्** **-** निर्दिष्टविषयमधिकृत्य टिप्पणीलेखनम्।

प्रश्नः 21 "रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता" - विशदयत।

समयः - 6 निमेषाः

अङ्काः - 3

**पाठ्यचर्योद्देश्यम्** **-** आयुर्वेदचिकित्सासम्प्रदाये तात्पर्योत्पादनम्।

प्रश्नः 22 त्रयाणाम् आयुर्वेदौषधानां नामानि लिखत।

समयः - 6 निमेषाः

अङ्काः - 3

**पाठ्यचर्योद्देश्यम्** **-** भाषान्तरीकरणसामर्थ्यं सम्पादयति।

प्रश्नः 23 प्रादेशिकभाषायां विवर्तयत।

काशीनगरं पुराणप्रसिद्धं भवति। तत्र विश्वप्रसिद्धं विश्वनाथमन्दिरम् अस्ति। प्रतिदिनं बहवः भारतीयाः वैदेशिकाश्च अत्र विश्वनाथदर्शनाय आगच्छन्ति। केचन गङ्गास्नानाय काशीम् आगच्छन्ति। केचन शिक्षायै अनुसन्धानाय च।

समयः - 10 निमेषाः

अङ्काः - 5

**पाठ्यचर्योद्देश्यम्** **-** भाषान्तरीकरणसामर्थ्यं सम्पादयति।

प्रश्नः 24 अभिज्ञानशाकुन्तलस्य इतिवृत्तं महाभारतात् स्वीकृतं भवति। शकुन्तलादुष्यन्तयोः कथा अत्र उपवर्णिता। मृगयार्थं वनं गतः दुष्यन्तः कण्वाश्रमं प्राप। पुरुवंशराजः सः तत्र रूपयौवनसम्पन्नां शकुन्तलां दृष्टवान्। दर्शनमात्रेण प्रवृद्धानुरागः सः तां पर्यणयत्।

समयः - 10 निमेषाः

अङ्काः - 5

# पादवार्षिकमूल्यनिर्णयः - संस्कृतम्

## कक्ष्या - X

प्रश्नसञ्चयः　　　　　　　　　　　　संस्कृतविद्यालयानां कृते (Part II)

## एककम् १ - गुरुभक्तिमहिमा

### 1. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

**प्रश्नपाठः।**

गुरुभक्तिमहिमा नाम कथा कस्मात् ग्रन्थात् स्वीकृता?

(रामायणात्, महाभारतात्, पञ्चतन्त्रात्)

**पाठ्यचर्योद्देश्यम्।**

काव्यानि तत्कर्तॄन् च अधिकृत्य ज्ञानम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** महाभारतात् - 1

### 2. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

**प्रश्नपाठः।**

महाभारतस्य कर्ता कः?

(वाल्मीकिः, वेदव्यासः, कालिदासः)

**पाठ्यचर्योद्देश्यम्।**

काव्यानि तत्कर्तॄन् च अधिकृत्य ज्ञानम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** वेदव्यासः - 1

## 3. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

**प्रश्नपाठः।**

उपमन्युः कथम् अन्धीभूतः ?
(अर्कपत्राणां भोजनेन, दुग्धपानेन, निराहारेण)

**पाठ्यचर्योद्देश्यम्।**

कथां पठित्वा आशयग्रहणम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

**मूल्यनिर्णयसूचकाः** अर्कपत्राणां भोजनेन - 1

## 4. प्रश्ननिर्देशः।

सूचनानुसारं कथां विपुलीकुरुत।

**प्रश्नपाठः।**

अश्विनीदेवयोः पुरतः उपमन्युः तस्य गुरुभक्तिः कथं प्रकटितवान् इति सूचनामनुसृत्य लिखत।

कूपपतनं - गुरोरन्वेषणाम् - अर्कपत्रभक्षणकथनम् - गुरोः निर्देशः - अश्विनीदेवयोः स्तुतिः - अपूपदानं - तिरस्कारः - अनुग्रहः।

**पाठ्यचर्योद्देश्यम्।**

कथां पठित्वा आशयग्रहणम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विपुलनं च।

समयः - 10 निमेषाः

अङ्कः - 5

**मूल्यनिर्णयसूचकाः**

| | | |
|---|---|---|
| सूचनास्वीकाराय | - | 2 |
| विपुलनाय | - | 2 |
| आशय पूर्णतायै | - | 1 |
| **आहत्य** | **-** | **5** |

## 5. प्रश्ननिर्देशः।

गुरुभक्तिमहिमासूचकं सुभाषितं चित्वा लिखत।

**प्रश्नपाठः।**

- अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
  चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।
- विद्या ददाति विनयं
  विनयाद्याति पात्रताम्।
  पात्रत्वाद्धनमाप्नोति
  धनाद्धर्मः ततस्सुखम्।।

**पाठ्यचर्योद्देश्यम् ।**

गुरुमहिमासूचकानां सुभाषितानां चयनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** अज्ञानतिमिरान्धस्य.................. इति श्लोकम् - 2

## 6. प्रश्ननिर्देशः।

गुरुभक्तिमहिमासूचकं सुभाषितं चित्वा लिखत।

**प्रश्नपाठः।**

- अपूर्वः कोऽपि कोशोऽयं
  विद्यते तव भारति।
  व्ययतो वृद्धिमायाति
  क्षयमायाति सञ्चयात्।।

- अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
  तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।।

**पाठ्यचर्योद्देश्यम् ।**

गुरुमहिमसूचकानां सुभाषितानां चयनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

**मूल्यनिर्णयसूचकाः** अखण्डमण्डलाकारम् .................. इति श्लोकम - 2

# एककम् ३ - अलङ्कारः

## 1. प्रश्नपाठः।

कोष्ठकात् शब्दालङ्कारं चित्वा लिखत।

(यमकं, दीपकं, दृष्टान्तः)

### पाठ्यचर्योद्देश्यम्।

अलङ्काराणां परिचयसम्पादनम्।

### मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 2. प्रश्ननिर्देशः।

कोष्ठकात् अलङ्कारः कः इति चित्वा लिखत।

### प्रश्नपाठः।

सर्वदो माधवः पायात्
स योऽगंगामदीधरत्।

(प्रकृतश्लेषः, अप्रकृतश्लेषः, प्रकृताप्रकृतश्लेषः)

### पाठ्यचर्योद्देश्यम्।

अलङ्काराणां परिचयसम्पादनम्।

### मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 3. प्रश्ननिर्देशः।

कोष्ठकात् अलङ्कारः कः इति चित्वा लिखत।

**प्रश्नपाठः।**

उच्चरत् भूरिकीलालः शुशुभे वाहिनीपतिः।

(प्रकृताप्रकृतश्लेषः, यमकम्, विरोधाभासः)

**पाठ्यचर्योद्देश्यम्।**

अलङ्काराणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 4. प्रश्ननिर्देशः।

प्रदत्तेषु अलङ्कारेषु अर्थान्तरन्यासस्य उदाहरणं विविच्य लिखत।

**प्रश्नपाठः।**

धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।

अलं महीपाल! तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्तिरंहः
शिलोच्चये मूर्च्छति मारुतस्य।।

**पाठ्यचर्योद्देश्यम्।**

अलङ्काराणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्कः - 2

## 5. प्रश्नपाठः।

विरोधाभासालङ्कारं लक्ष्यलक्षणसमन्वयपूर्वकं विशदयत।

**पाठ्यचर्योद्देश्यम्।**

अलङ्काराणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

स्मरणम्। सयुक्तिकसमर्थनम्।

समयः - 6 निमेषाः

अङ्काः - 3

## 6. प्रश्ननिर्देशः।

अलङ्कारं निर्णयत।

**प्रश्नपाठः।**

यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता।

**पाठ्यचर्योद्देश्यम्।**

अलङ्काराणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2

# एककम् ३ - वृत्तानि

## 1. प्रश्नपाठः।

कोष्ठकात् वर्णवृत्तं चित्वा लिखत।

(आर्या, गीतिः, स्रग्धरा)

## पाठ्यचर्योद्देश्यम्।

मात्रावृत्तानां वर्णवृत्तानां च विविच्य ज्ञानम्।

## मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 2. प्रश्नपाठः।

कोष्ठकात् मात्रावृत्तं चित्वा लिखत।

(स्रग्धरा, आर्या, मन्दाक्रान्ता)

## पाठ्यचर्योद्देश्यम्।

मात्रावृत्तानां वर्णवृत्तानां च विविच्य ज्ञानम्।

## मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 3. प्रश्नपाठः।

कोष्ठकात् अर्धसमवृत्तं चित्वा लिखत।

(शार्दूलविक्रीडितं, स्रग्धरा, पुष्पिताग्रा)

## पाठ्यचर्योद्देश्यम्।

अर्धसमवृत्तस्य ज्ञानम्।

## मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

| | | |
|---|---|---|
| समयः | - | 2 निमेषाः |
| अङ्कः | - | 1 |

## 4. प्रश्ननिर्देशः।

अधो दत्तस्य श्लोकस्य गणं निर्णयत।

## प्रश्नपाठः।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श।।

## पाठ्यचर्योद्देश्यम्।

गणनिर्णयज्ञानम्।

## मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

| | | |
|---|---|---|
| समयः | - | 4 निमेषाः |
| अङ्काः | - | 2 |

## 5. प्रश्ननिर्देशः।

अधो दत्तस्य श्लोकस्य गणनिर्णयं कृत्वा वृत्तं लिखत।

### प्रश्नपाठः।

एवं भूतमनोज्ञतानवसुधानिष्यन्दसन्दोहनं
त्वद्रूपं परिचिद्रसायनमयं चेतोहरं शृण्वताम्।
सद्यः प्रेरयते मतिं मदयते रोमाञ्चयत्यङ्गकं
व्यासिञ्चत्यपि शीतबाष्पविशरैरानन्दमूर्छोद्भवैः।।

### पाठ्यचर्योद्देश्यम्।

गणनिर्णयं कृत्वा वृत्तनिर्णयः।

### मानसिकव्यापाराः

अपग्रथनं निर्णश्च।

समयः - 8 निमेषाः

अङ्काः - 4

## 6. प्रश्ननिर्देशः।

गणनिर्णयं कृत्वा लक्ष्यलक्षणसमन्वयपूर्वकं वृत्तं निर्णयत।

### प्रश्नपाठः।

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिल भूषणानि सततं वाग्भूषणं भूषणम्।।

### पाठ्यचर्योद्देश्यम्।

गणनिर्णयपूर्वकं वृत्तनिर्णयः लक्ष्यलक्षणसमन्वयश्च।

**मानसिकव्यापाराः**

अपग्रथनं निर्णश्च।

समयः - 10 निमेषाः

अङ्काः - 5

# एककम् ३ - कारकाणि

## 1. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं स्वीकृत्य लिखत।

**प्रश्नपाठः।**

कर्तुरीप्सिततमं ........................।

(कर्ता, करणं, कर्म)

2. कर्मणि ........................।

(तृतीया, द्वितीया, चतुर्थी)

3. 'तटः' अत्र प्रयुक्तः विभक्तिः।

(तृतीया, चतुर्थी, प्रथमा)

4. रामः पयसा ओदनं भुङ्क्ते। अत्र ओदनम् इत्यस्य विभक्तिः।

(प्रथमा, द्वितीया, तृतीया)

5. सूत्रस्य वृत्तिं लिखत।

अकथितञ्च

6. उदाहरणसहितं सूत्रं व्याख्यात।

कर्तुरीप्सिततमं कर्म।

7. रेखाङ्कितपदयोः विभक्ती कौ?

श्रीशङ्करः बाल्ये गोविन्दभगवत्पादात् सन्यासं स्वीचकार।

8. सूचनानुसारं लिखत।

बालौ + आगतौ - बालावागतौ।

एवं चेत् तुष्टौ + अश्विनौ -

अत्र प्रवृत्तं सूत्रं किम् इति लिखत।

**पाठ्यचर्योद्देश्यम्।**

कारकाणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 2. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं स्वीकृत्य लिखत।

**प्रश्नपाठः।**

कर्मणि ........................।

(तृतीया, द्वितीया, चतुर्थी)

**पाठ्यचर्योद्देश्यम्।**

कारकाणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

स्मरणम्।

समयः - 2 निमेषाः

अङ्कः - 1

## 3. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं स्वीकृत्य लिखत।

**प्रश्नपाठः।**

'तटः' अत्र प्रयुक्तः विभक्तिः।

(तृतीया, चतुर्थी, प्रथमा)

**पाठ्यचर्योद्देश्यम्।**

कारकाणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 4. प्रश्ननिर्देशः।

कोष्ठकात् समुचितमुत्तरं स्वीकृत्य लिखत।

**प्रश्नपाठः।**

रामः पयसा ओदनं भुङ्क्ते। अत्र ओदनम् इत्यस्य विभक्तिः।

(प्रथमा, द्वितीया, तृतीया)

**पाठ्यचर्योद्देश्यम्।**

कारकाणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

समयः - 2 निमेषाः

अङ्कः - 1

## 5. प्रश्ननिर्देशः।

सूत्रस्य वृत्तिं लिखत।

**प्रश्नपाठः।**

अकथितञ्च।

**पाठ्यचर्योद्देश्यम्।**

कारकाणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

स्मरणम्।

| | | |
|---|---|---|
| समयः | - | 4 निमेषाः |
| अङ्काः | - | 2 |

## 6. प्रश्ननिर्देशः।

उदाहरणसहितं सूत्रं व्याख्यात।

**प्रश्नपाठः।**

कर्तुरीप्सिततमं कर्म।

**पाठ्यचर्योद्देश्यम्।**

कारकाणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

स्मरणम्।

| | | |
|---|---|---|
| समयः | - | 6 निमेषाः |
| अङ्काः | - | 3 |

## 7. प्रश्ननिर्देशः।

रेखाङ्कितपदयोः विभक्ती के?

**प्रश्नपाठः।**

<u>श्रीशङ्करः</u> बाल्ये <u>गोविन्दभगवत्पादात्</u> सन्यासं स्वीचकार।

**पाठ्यचर्योद्देश्यम्।**

कारकाणां परिचयसम्पादनम्।

**मानसिकव्यापाराः**

आशयापग्रथनं विवेचनं च।

| | | |
|---|---|---|
| समयः | - | 4 निमेषाः |
| अङ्काः | - | 2 |

## 8. प्रश्ननिर्देशः।

सूचनानुसारं लिखत।

**प्रश्नपाठः।**

बालौ + आगतौ - बालावागतौ।

एवं चेत् तुष्टौ + अश्विनौ -

अत्र प्रवृत्तं सूत्रं किम् इति लिखत।

## पाठ्यचर्योद्देश्यम्।

सन्धिज्ञानं सम्पादयति।

## मानसिकव्यापाराः

आशयापग्रथनं विवेचनं च।

समयः - 4 निमेषाः

अङ्काः - 2